# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – वास्तुशास्त्रम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – मयमतम्** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ तैतलानां द्विजादीनां वर्णानां वासयोग्यकाः।
एकद्वित्रिचतुस्सप्तदशशालाश्च षड्विधाः॥

२ अर्पितानार्पितं चैव प्रासादवदलङ्कृतम्।
पुरतः पार्श्वयोः पृष्ठेऽलिन्द्रं कुर्यात् समन्ततः॥

३ नराणां च सुराणां च पाषण्ड्याश्रमिणां तथा।
पुरतो मण्डपोपेतं पृष्ठे पार्श्वे तु भद्रकम्॥

४ सर्वेषामपि जातीनां सामान्यमिति विद्यते।
दक्षिणे पश्चिमे चैव शाला वैषेशिका नृणाम्॥

**प्रश्नः २** द्वारविधानं विलिख्यताम्।

**प्रश्नः ३** गृहविन्यासः विलिख्यताम्।

**प्रश्नः ४** शीलालक्षणं विलिख्यताम्।

**प्रश्नः ५** पीठलक्षणं विलिख्यताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ यावद्धनतां यान्ति यावत्सौम्यप्रयोज्यानि।
यावत्तदेव धीमान्नवतां प्रकर्तुमिच्छति चेत्॥

२ नागरभवने नागरमुदितं स्याद् द्राविडभवने द्राविडमुदितम्।
वेसरभवने स्याद् वेसरं शुभदमर्पितभवनेऽप्यर्पितभवनम्॥

३ भवने जीर्णमथ तत्कर्तव्यं चेत्तदन्यस्मिन् ।
दिक्षु चतुर्ष्वपि नेष्टं तस्य बाह्ये वस्तुविदा ॥
४ अन्यत्सूर्यकिरणान्निहतं लिङ्गं स्थापयेत्तत्र ।
अन्त्येनान्तरितं वा श्वभ्रान्तं नैव साम्प्रतम् ॥

प्रश्नः ७ भवनजीर्णोद्धारविधिः विलिख्यताम् ।

प्रश्नः ८ महेश्वरस्य प्रतिमालक्षणं विलिख्यताम् ।

प्रश्नः ९ बुद्धस्य प्रतिमालक्षणं विलिख्यताम् ।

प्रश्नः १० दुर्गाप्रतिमालक्षणं विलिख्यताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ एकस्यामङ्गुल्यां कति यवाः भवन्ति ?
२ पाकगृहं कस्मिन् कोणे शुभं भवति ?
३ एकस्मिन् हस्ते कति अङ्गुल्यः भवन्ति ?
४ कुशयुक्ता भूमिः कस्य वर्णस्य कृते उत्तमा भवति ?
५ ब्रह्मस्थानं गृहे कुत्र भवति ?
६ कस्मिन् कोणे शिलान्यासः शुभो भवति ?
७ पश्चिमोत्तरयोर्मध्ये कः कोणः भवति ?
८ शुद्रवर्णस्य कृते कस्य वर्णस्य भूमिः श्रेष्ठा भवति ?
९ सूर्यस्य मित्राणां नामानि लिखत ।
१० ब्राह्मणराशीनां कृते कस्मिन् दिशि द्वारं शुभं भवति ?
११ क्षत्रियराशीनां कृते कस्मिन् दिशि द्वारं शुभं भवति ?
१२ स्वागतकक्षः कस्मिन् कोणे शुभो भवति ?
१३ अध्ययनकक्षः कस्यां दिशि शुभो भवति ?
१४ शस्त्रगृहं कस्यां दिशि कोणे वा शुभं भवति ?
१५ पूर्वदिशः स्वामी कः ग्रहः भवति ?

****